

# 8 काकस्य चातुर्यम्




एकस्मिन् वने एकः वटवृक्षः अस्ति। तत्र काकः वसति। काकस्य पत्नी शावकैः सह तत्रैव वसति। तस्य वृक्षस्य अधः कोटरे एकः सर्पः वसति।

एकदा काकः भार्यया सह आहारार्थं गच्छति। तदा सर्पः एकं शावकं खादति।




यदा काकः आगच्छति पश्यति च। एकः शावकः नीडे नास्ति। वृक्षस्य अधः सर्पं दृष्ट्वा काकः वदति, 'अहो, एषः दुष्टसर्पः शावकं खादति। कञ्चित् उपायं करोमि।' इति विचिन्त्य काकः नदीं प्रति गच्छति।



तत्र राजकुमारी स्नानं करोति। तस्याः सुवर्णहारः नदीतीरे अस्ति। चतुरः काकः सुवर्णहारम् अपहरति।





काकः सुवर्णहारं कोटरस्य अन्तः क्षिपति। सैनिकः काकस्य पृष्ठे आगच्छति। कोटरे सुवर्णहारं सर्पं च पश्यति। सः चिन्तयति, "अहो प्रथमं सर्पं मारयामि, अनन्तरं हारं नयामि।"

सैनिकः सर्पं मारयति हारं नयति ।
काकः वदति 'अहो, सर्पः मृतः। अधुना सुखेन वसामि ।'



## Glossary

**अधः** below **कोटरे** in the hollow **एकस्मिन्** any one **शावकैः** young one **सह** with **तत्रैव** there only **आहारार्थम्** for food **पृष्ठे** behind **अनन्तरम्** later on **नयामि** (I) am taking **अधुना** now **नीडे** in a nest **कञ्चित्** any **विचिन्त्य** after thinking **अपहरति** is taking away

विशेषः
तत्रैव तत्र एव

## Exercise

**1. Pronounce the following words clearly :**

शावकैः　दुष्टसर्पः　विचिन्त्य　सुवर्णहारम्　चिन्तयति ।

2. Complete the following sentences. Follow the Illustration :

सर्पः ____________ वसति। (कोटरम्)

Example : सर्पः कोटरे वसति।

(1) सिंहः ____________ वसति। (वनम्)

(2) मनुष्यः ____________ वसति। (नगरम्)

(3) खगः ____________ वसति। (नीडः)

(4) वानरः ____________ वसति। (वृक्षः)

(5) मत्स्यः ____________ वसति। (जलम्)

3. Complete the following sentences. Follow the Illustration :

Example : काकः नदीं प्रति गच्छति।

(1) छात्रः ____________ प्रति गच्छति। (शाला)

(2) कृषिकः ____________ प्रति गच्छति। (क्षेत्र)

(3) व्याघ्रः ____________ प्रति गच्छति। (वन)

(4) हंसः ____________ प्रति गच्छति। (सरोवर )

4. Write the following sentences in legible hand-writings :

(1) एकस्मिन् वने एकः वटवृक्षः अस्ति। ____________

(2) एकः दुष्टः सर्पः शावकं खादति। ____________

(3) तस्याः सुवर्णहारः नदीतीरे अस्ति। ____________

(4) सैनिकः काकस्य पृष्ठे आगच्छति। ____________

(5) सैनिकः सर्पं मारयति। ____________

5. Write here the words which your teacher dictates you :

| | |
|---|---|
| (1) | |
| (2) | |
| (3) | |
| (4) | |
| (5) | |